१४

अध्यासकारणविचारः

प्रस्तावना

ब्रह्मणि अखिलं जगद् अध्यस्तम्। जगत् हि मिथ्या। अज्ञानकारणात् जीवः स्वस्वरूपम् अजानन् सुखदुःखादिकम् अनुभवति। ब्रह्मणो अज्ञानस्य कार्येण मिथ्याभूतेन अन्तःकरणेन सह मिथ्यासम्बन्धवशात् जीवभावः। जगतः मिथ्यात्वं विज्ञाय यथा वैराग्यं जायेत, जीवभावस्य मिथ्यात्वं विज्ञाय च यथा जीवः स्वस्वरूपज्ञानाय प्रवर्तेत तदर्थं कथमध्यासो भवति इति विज्ञेयम्। यथा ज्वरकारणं विज्ञायते चेत् ज्वरस्य उपशमार्थम् उपचारकल्पनायां सौविध्यं जायते तथैव अध्यासकारणानां ज्ञाने तेषां निरोधः सुशको भवति। किमध्यस्तं किं च सत्यमित्यस्य ज्ञानार्थं अध्यस्तुवस्तुनः स्वरूपं सुतरां विज्ञेयम्। अध्यस्तवस्तुनः किं तावत् स्वरूपम् इत्यस्मिन् विषये भारतीयास्तिकदर्शनेषु मिथो मतविरोधः अपि वर्तते। पूर्वस्मिन् पाठे अध्यासालोचनस्य प्रयोजनम्, अध्यासलक्षणं, अध्यासभेदाः, अध्याससत्त्वे प्रमाणानि चोपन्यस्तानि। अस्मिन् पाठे वयम् अध्यासकारणानि, अध्यस्तवस्तुनः स्वरूपम्, तस्य वस्तुनः स्वरूपप्रतिपादनविषये भारतीयदर्शनानां यानि परस्परविरुद्धानि मतानि सन्ति तानि आलोचयामः।

उद्देश्यानि

- अध्यस्तवस्तूनाम् उत्पत्तिप्रकारः
- भ्रमज्ञानस्य स्वरूपम्
- अध्यासस्य उपादानं निमित्तकारणं च
- अध्यस्तवस्तुनः स्वरूपम्
- सलक्षणं सत्तात्रयम्
- विवर्तपरिणामयोः स्वरूपम्

१४.१) अध्यस्तवस्तूपत्तिविचारः

प्रमा नाम यथार्थज्ञानम्। प्रमाया लक्षणमुच्यते वेदान्तपरिभाषायाम्- "अनधिगताबाधितार्थविषयज्ञानत्वम्" इति। ब्रह्मचैतन्यम् अखिलप्रपञ्चस्य उपादानं, तस्मात् सर्वत्र तादात्म्येन ब्रह्म वर्तमानं सत् स्वसंसृष्टं जगद् अवभासयति। उच्यते च सिद्धान्तलेशसङ्ग्रहे जीवाल्पज्ञत्वविषये विवरणमतालोचनकाले अप्पय्यदीक्षितेन- "ब्रह्मचैतन्यं सर्वोपादानतया सर्वतादात्म्यापन्नं सत् स्वसंसृष्टं सर्वमवभासयति न जीवचैतन्यम्" इति। जीवस्य अन्तःकरणेन एव

सम्बन्धः, न बाह्यघटादिविषयेन सह तस्य साक्षात् सम्बन्धो वर्तते। यदा अन्तःकरणं नयनादिद्वारेण निर्गत्य विषयपर्यन्तं दीर्घप्रभाकारेण परिणम्य विषयं व्याप्नोति तदा एव विषयाकारा अन्तःकरणवृत्तिरुदेति। सा अन्तःकरणवृत्तिः विषयचैतन्यस्य आवरकम् अज्ञानम् अभिभवति। तेन विषयचैतन्यस्य अभिव्यक्तिः सञ्जायते। ततो विषयस्य ज्ञानं भवति।

ज्ञानस्य ब्रह्मस्वरूपत्वेऽपि वृत्तिधर्मस्य जन्यत्वस्य ज्ञाने आरोपात् ज्ञानं जायते इत्युच्यते। विवरणे प्रकाशात्मयतिना उच्यते- "ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वोपचारः" इति। तथाहि विषयप्रत्यक्षनिमित्तं चैतन्यत्रयमुच्यते विषयचैतन्यं प्रमाणचैतन्यं प्रमातृचैतन्यं चेति। घटाद्यवच्छिन्नचैतन्यं विषयचैतन्यम्, अन्तःकरणवृत्त्यवच्छिन्नचैतन्यं प्रमाणचैतन्यं, अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्। यथा तडागस्य जलं छिद्रान्निर्गत्य नालिकाद्वारा केदारान्प्रविश्य केदाराकारानुसारं त्रिकोणचतुष्कोणाद्याकारं भवति, तथा तैजसम् अन्तःकरणं चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते। अयं परिणाम एव वृत्तिरित्युच्यते। एवं विषयावच्छिन्नचैतन्य-प्रमातृचैतन्ययोः अभेदे सति विषयस्य ज्ञानं जायते। विषयावच्छिन्नचैतन्यस्य प्रमातृचैतन्यस्य च समाना एव सत्ता, उभयोरेव चैतन्यस्वरूपत्वात्।अतः तयोः ऐक्ये न काचिदनुपपत्तिः। अधिष्ठानस्य सत्ता एव आरोपितेषु विद्यते, न हि आरोपितानां भिन्ना सत्ता अस्ति। विषयादिसकलप्रपञ्चः ब्रह्मणि अध्यस्तः, अतः सर्वत्रापि ब्रह्मसत्ता एवानुवर्तते।

एवं शुक्तिरूप्यादिभ्रमज्ञानस्थले देशान्तरस्थस्य रजतस्य न शुक्तौ भानम्, तस्य असन्निकृष्टत्वात् प्रत्यक्षविषयता न सम्भवति। ननु रजतोत्पादकानां रजतावयवानां शुक्तौ अभावात् कथं प्रातिभासिकरजतोत्पत्तिरिति चेदुच्यते न हि लोकप्रसिद्धसामग्री प्रातिभासिकरजतम् उत्पादयति किन्तु विलक्षणा एव सामग्री अत्र अपेक्षिता।

तथाहि प्रकाशकारणात् चाकचिक्ययुक्तां शुक्तिमालोक्य काचकामलादिदोषदूषितलोचनस्य पुरोवर्तिना शुक्तिद्रव्येण संसर्गात् इदमाकारा चाकचिक्याकारा काचिद् अन्तःकरणवृत्तिः उदेति। तस्यां च वृत्तौ इदमवच्छिन्नं चैतन्यं प्रतिबिम्बते। तत्र तडागोदकन्यायेन वृत्तेर्निर्गमनेन इदमवच्छिन्नं चैतन्यं वृत्त्यवच्छिन्नं चैतन्यं प्रमातृचैतन्यं चाभिन्नं भवति, शुक्तिरूपसमानदेशस्थत्वात्। अन्तःकरणवृत्त्या चात्र इदन्त्वरूपसामान्यमात्रं विषयीक्रियते न तु शुक्तित्वरूपविशेषः। ततश्च प्रमातृचैतन्याभिन्न-विषयचैतन्यनिष्ठा शुक्तित्वप्रकारिका अविद्या चाकचिक्यादिसादृश्यदर्शनकारणात् उद्बोधितरजतसंस्कारसामग्रीसहिता काचकामलादिदोषसहिता रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमते।

इन्द्रियदोष-सादृश्य-संस्कारादिसामग्रीसहिता अविद्या एकैव कथं रजतरूपेण कदाचिद्वा रङ्गरूपेण परिणमते इति चेदुच्यते यत्पुरुषीया या अविद्या यादृशसंस्कारेण सह वर्तते, सा तस्य पुरुषस्य सविधे तदाकारेण एव परिणमते, नान्याकारेण। अत्रेष्टसिद्धिकाराः कथयन्ति यत्- "यस्याज्ञानं भ्रमस्तस्य भ्रान्तः सम्यक् च वेत्ति सः" इति। तस्मादेव एकस्यां शुक्तौ कस्यचित् रजतभ्रमः कस्यचिच्च रङ्गभ्रमो जायते।

एवं शुद्धब्रह्मणि घटादिव्यावहारिकवस्त्वध्यासे अविद्यैव दोषत्वेन हेतुः। शुक्तिरूप्यादिस्थले तु काचादयः एव दोषत्वेन अङ्गीक्रियते। अतः आगन्तुकदोषजन्यत्वं प्रातिभासिकत्वे नियामकम्। स्वप्नोपलब्धरथादीनाम् आगन्तुकनिद्रादिदोषजन्यत्वात्प्रातिभासिकत्वम्। अयं च धर्म्यध्यासः।

धर्मिणोर्विवेके ज्ञायमानेऽपि एकधर्मिगतधर्माणाम् अन्यधर्मिणि अध्यासे उदाहरणं तावत्- पीतः शङ्खः इति। तथाहि- बहिर्निष्क्रान्तेन स्वच्छनयनरश्मिना सम्पृक्तं पित्तद्रव्यगतं पीततामात्रम् (न तु तदधिष्ठानम्) अनुभवन्, शङ्खे च इन्द्रियदोषकारणात् शुक्लिमानम् आच्छादितम् अननुभवन्, पीततायाः शङ्खासम्बन्धम् अननुभूय "पीतं तपनीयपिण्डम्" "पीतं बिल्वफलम्" इत्यादिषु पूर्वदृष्टं सामानाधिकरण्यं पीतत्वशङ्खयोः आरोप्य भवति व्यवहारः पीतः शङ्खः इति वाचस्पतिमिश्रादिभिरुच्यते।

१४.२) भ्रमज्ञानविचारः

शुक्तौ इदं रजतम् इति जायमानं ज्ञानम् भ्रमः एव। भ्रमज्ञाने अधिष्ठानैकदेशस्य आरोप्यस्य च तादात्म्येन भानं भवति। यत्र आरोपो भवति तदधिष्ठानम्। यदा शुक्तौ रजतस्य आरोपो भवति तदा शुक्तिः रजतस्य अधिष्ठानम्। अधिष्ठानस्य सामान्यांशो विशेषांशश्च वर्तेते। यथा इदं रजतम् इति ज्ञाने इदमिति शुक्तेः सामान्यांशः। यदा काचकामलादिदोषदूषितेन चक्षुरिन्द्रियेण सह शुक्तेः संयोगो भवति, तदा चक्षुर्द्वारा चान्तःकरणस्य शुक्त्या सम्बन्धवशात् इदमाकारा अन्तःकरणवृत्तिरुदेति। इन्द्रियदोषकारणात् शुक्तित्व-नीलपृष्ठत्वादिविशेषस्य ज्ञानं नैव भवति। अतः इदं रजतम् इति ज्ञाने इदमंशः स्वरूपतो न मिथ्या। उच्यते च पञ्चदशीकारेण विद्यारण्यस्वामिना – "इदमंशस्य सत्यत्वं शुक्तिगं रूप्य ईक्षते" इति। एवं प्रत्येकस्मिन् एव भ्रमे अधिष्ठानस्य सामान्यांशः प्रतिभाति। शुक्तौ आरोपितेन रजतेन सह अन्तःकरणस्य संयोगो नास्ति, अतः रजताकारा अन्तःकरणवृत्तिः नैव उदेति। अद्वैतवेदान्ते ज्ञानस्थले विषयाकारा वृत्तिः सुतरामङ्गीकरणीया, अतः शुक्तौ रजतज्ञानस्थले रजताकारा अविद्यावृत्तिः अङ्गीक्रियते। तेन च रजतस्य ज्ञानं सम्भवति। इदं रजतम् इति भ्रमज्ञाने विद्यमानः रजतांशस्तु मिथ्या, व्यावहारिकरजतस्य तत्र अविद्यमानत्वात्। अतः 'इदं रजतम्' इति भ्रमज्ञाने इदमंशः स्वरूपतो न मिथ्या, रजतांशस्तु मिथ्या एव। शुक्त्यंशत्वात् इदमंशेन सह नास्ति रजतस्य सम्बन्धः परन्तु इदं रजतम् इति ज्ञाने इदन्तादात्म्येन रजतस्य भानात् इदं रजतम् इति ज्ञानं मिथ्या।

एवमेव ब्रह्मणि प्रपञ्चस्य आरोपवशाद् भवति ज्ञानं घटः सन् इति। सत्ताविशिष्टः सत्तादात्म्यापन्नो वा घट इति तदर्थः। अस्मिन् ज्ञाने सन् इत्यंशो अधिष्ठानस्य ब्रह्मणः, नायं स्वरूपतो मिथ्या। घटस्य ब्रह्मणि आरोपितत्वात् मिथ्यात्वं दुर्वारम्। यद्यपि सन् इत्यंशेन सह नास्ति घटस्य सम्बन्धः तथापि घटेन सह तादात्म्येन सन् इत्यंशस्य भानात् घटः सन् इति ज्ञानं भ्रम एव। एवं सर्वत्रानुसन्धेयम्।

पाठगतप्रश्नाः १

१. प्रमायाः लक्षणं किम्।

२. किं नाम विषयचैतन्यम्।

३. किं नाम प्रमाणचैतन्यम्।

४. किं नाम प्रमातृचैतन्यम्।

५. शुक्तिरजतोत्पत्तौ को तावत् इन्द्रियदोषः।

६. प्रातिभासकत्वे किं तावत् नियामकम्।

७. इदं रजतम् इति ज्ञाने कः शुक्तेः सामान्यांशं निर्दिशति।

८. इदमंशस्य सत्यत्वेऽपि कथं इदं रजतम् इति ज्ञाने सः भ्रम इति कथ्यते।

९. इन्द्रियदोषकारणात् शुक्तेः केषामंशानां ज्ञानं न भवति।

१०. ज्ञानस्थले अन्तःकरणवृत्तिः किमर्थम् अपेक्षिता।

११. एकैव अविद्या कथं कदाचिद्रजतरूपेण कदाचिद्वा रङ्गरूपेण विपरिणमते।

१४.३) अध्यासस्य उपादानम् निमित्तकारणं च

आगन्तुकदोषः संस्कारः अधिष्ठानसामान्यज्ञानम् सादृश्यम् अविद्या च अध्यस्तवस्तूत्पतौ हेतुरूपेण अङ्गीक्रियन्ते। तेषु सत्स्वेव अध्यासो भवति न तदभावे। एतेषु कारणेषु पुनः अविद्या अध्यस्तवस्तुनः उपादानकारणं भवति। इतराणि निमित्तकारणानि सन्ति। यस्मात् कार्यस्य उत्पत्तिः, कार्यनाशे कार्यस्य लयश्च यत्र सञ्जायेते तदेव उपादानकारणम्। तथाहि, घटः मृत्तिकाया उत्पद्यते घटनाशे च मृत्तिकायामेव घटस्य लयो भवति, अतो मृत्तिका घटस्य उपादानम्। अध्यस्तं वस्तुजातम् अविद्यायाः परिणामः, लयश्च तेषाम् अज्ञाने एव भवति। सर्वमपि कार्यं तेषाम् उपादानकारणस्य अविद्याया अधिष्ठाने ब्रह्मणि आश्रितं तिष्ठति। अतो शुक्तौ प्रतीयमानं रजतं वस्तुगत्या शुक्त्यवच्छिन्ने चैतन्ये अध्यस्तम्। वेदान्तपरिभाषायां धर्मराजाध्वरीन्द्रेण उक्तम् – "अस्मन्मते सर्वस्यापि कार्यस्य स्वोपादानाविद्याधिष्ठानाश्रितत्वनियमात्" इति। अतो प्रातिभासिकरजतस्य परिणामि उपादानकारणं भवति अविद्या, विवर्तोपादानकारणं च इदमवच्छिन्नं चैतन्यम्।

ननु संस्कारः अध्यासस्य कारणं नास्ति, प्रथमोत्पत्तौ संस्कारस्य अभावात्। तथाहि, ब्रह्मणि वर्तमानजगदध्यासं प्रति पूर्वजगत्संस्कारः हेतुः, पूर्वजगदध्यासं प्रति तत्पूर्वजगत्संस्कारो हेतुः। परन्तु प्रथमजगदुत्पत्तौ कथं संस्कारः हेतुः स्यादिति चेदुच्यते संसारो हि अनादिः, अतः प्रथमजगतः निरूपणम् अशक्यम्। तदाश्रित्य च अयं पूर्वपक्षोऽपि न सम्भवतीति। उक्तञ्च शङ्कराचार्येण श्रीमद्भगवद्गीताभाष्ये – "यथा अस्मिन् जन्मनि देहादिसङ्घाताभिमानरागद्वेषादिकृतौ धर्माधर्मौ तत्फलानुभवश्च, तथा अतीते अतीततरेऽपि जन्मनि इति अनादिरविद्याकृतः संसारः अतीतोऽनागतश्च अनुमेयः" इति।

ननु सादृश्यं न हि सर्वत्राध्यासे निमित्तकारणरूपेण वर्तते सादृश्याभावेऽपि अध्यासो सुतरां भवति। यथा पीतः शङ्खः, आकाशस्य तलमालिन्यावभासश्च इत्यादिषु। रज्वां सर्पभ्रमो यद्यपि अवयवगतसादृश्यकारणात् भवति तथापि ब्रह्मणि प्रपञ्चस्याध्यासे ब्रह्मप्रपञ्चयोः कीदृशं वा सादृश्यं हेतुत्वेन वर्तते। दृग्दृश्ययोः चैतन्यजडयोः तमःप्रकाशवद्विरुद्धस्वभावयोः ब्रह्मप्रपञ्चयोः

अत्यन्तवैलक्षण्यसत्त्वेऽपि "अहमिदं ममेदम्" इति तादात्म्याध्यासदर्शनात् सादृश्यस्य सर्वविधाध्यासं प्रति कारणत्वं नाङ्गीक्रियते। अत उच्यते-

विवर्तस्तु प्रपञ्चोऽयं ब्रह्मणोऽपरिणामिनः।

अनादिवासनासम्भूतो न सारूप्यमपेक्षते॥ इति।

नृसिंहभट्टोपाध्यायमते यत्र अध्यासः शुक्तित्वादिविशेषदर्शनेन प्रतिबध्यते तत्रैवाध्यासे सादृश्यज्ञानस्य कारणत्वम्। तन्मतं च सङ्गृह्यते सिद्धान्तलेशसङ्ग्रहे- "सादृश्यज्ञानस्याध्यासकारणत्ववादेऽपि विशेषदर्शनप्रतिबध्येषु रजताद्यध्यासेष्वेव तस्य कारणत्वं वाच्यं, न तु तदप्रतिबध्येषु पीतशङ्खाद्यध्यासेषु, असम्भवात्" इति। अतः सादृश्यस्य क्वाचित्कं कारणत्वमङ्गीक्रियते।

१४.४) अध्यस्तवस्तुनः स्वरूपम्

आरोपितवस्तुनश्च अनिर्वचनीयत्वम् अद्वैतवादिनः अङ्गीकुर्वन्ति। तथाहि शुक्तौ रजतं न सत्, तस्य सत्त्वे इयं शुक्तिरित्युत्तरज्ञानेन न तस्य बाधः स्यात्। शुक्तिं च रजतात्मना गृह्णन् जनो भ्रान्त एव। शुक्तौ प्रतीयमानं रजतम् असत् इत्यपि वक्तुं न शक्यते, तस्य प्रतीयमानत्वात्। ननु देशान्तरस्थं रजतं तत्र प्रतिभासते इत्यपि न शक्यते वक्तुम्, "इदं रजतम्" इत इदङ्कारेण पुरोऽवस्थितत्वनिर्देशात्। अतः शुक्तौ रजतम् अस्ति चेन्न बाध्येत, नास्ति चेन्न प्रतीयेत। तच्च रजतं सदसत् इत्यप्यङ्गीकर्तुं न शक्यते, सदसतोः परस्परविरुद्धत्वात् तयोः सामानाधिकरण्यं नैव सम्भवति। अतो रजतं न सत्, नाप्यसत्, नापि सदसत् किन्तु सदसद्भ्यामनिर्वचनीयम्।

तच्च रजतम् अज्ञानोपादानकं तत्कालोत्पन्नम् अभिनवञ्च। रजतं विना रजतज्ज्ञानं नैव सम्भवति, अतः पुरोवर्तिन्यां शुक्तौ ज्ञानकाले प्रातिभासिकरजतोत्पत्तिः अङ्गीकरणीया। तस्य च रजतस्य अन्यत्र असत्त्वाद् तत्रैव च उत्पन्नत्वात् अभिनवत्वं सिध्यति।

पाठगतप्रश्नाः २

१२. अध्यस्तवस्तूत्पत्तौ के हेतुरूपेण तिष्ठन्ति।

१३. अध्यस्तवस्तुनः किं तावदुपादानम्।

१४. आगन्तुकदोष-संस्कारादयः अध्यस्तवस्तुनः कीदृशं कारणम्।

१५. किं नाम उपादानकारणम्।

१६. सर्वमपि कार्यं कुत्र अध्यस्तम्।

१७. केषु अध्यासेषु सादृश्यज्ञानं कारणम्।

१८. अद्वैतवेदान्तमते आरोपितवस्तुनः किं तावत् स्वरूपम्।

१९. ब्रह्मणि प्रपञ्चाध्यासे सादृश्यं किं हेतुत्वेन वर्तते।

१४.५) ख्यातिवादः

व्यक्तायां वाचि विद्यमानात् चक्ष्-धातोः भावे क्तिन्-प्रत्यये ख्यातिशब्दो निष्पद्यते। ख्यातिशब्दस्य ज्ञानम् इत्यर्थः। दर्शनशास्त्रे ख्यातिशब्दः भ्रमे भासमानवस्तुनः ज्ञाने रूढः। दार्शनिका भ्रमे भासमानवस्तुनः स्वरूपविषये विविधमतानि उपस्थापयन्ति। अतो विविधाः ख्यातयः प्रसिद्धिं गताः। तासु आत्मख्यातिः असत्ख्यातिः अख्यातिः अन्यथाख्यातिः अनिर्वचनख्यातिरिति पञ्च ख्यातयः प्रसिद्धाः। उक्तञ्च –

आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा।

तथानिर्वचनख्यातिरित्येतत्ख्यातिपञ्चकम्॥

योगाचारा माध्यमिकास्तथा मीमांसका अपि।

नैयायिका मायिनश्च पञ्च ख्यातीः क्रमाज्जगुः॥ इति। एतद्व्यतिरिच्यापि रामानुजस्य सत्ख्यातिः, वीरशैवानाम् अलौकिकख्यातिः, विज्ञानभिक्षोः सदसत्ख्यातिः, भाट्ट-पातञ्जलानाम् अन्यथाख्यातिः इत्यादयोऽपि ख्यातिविचारकाले आलोचनविषयतां गच्छन्ति। अत्र मुख्यानां पञ्च ख्यातीनाम् आलोचनं विधीयते।

आत्मख्यातिः – सौत्रान्तिक-वैभाषिक-योगाचाराणां च ख्यातिविषयको वादः आत्मख्यातिरित्युच्यते। तथाहि एतेषां मते रजतभ्रमे प्रतीयमानं रजतं ज्ञानाकारम्, तस्य बहिः आरोपो भवति। सौत्रान्तिकानां नये बहिः प्रत्यक्षे विषये, वैभाषिकानां मते बहिः अनुमिते विषये, योगाचाराणां च नये अनाद्यविद्यावासनारोपिते अलीके बाह्ये विषये ज्ञानाकारस्य विषयस्य आरोपो भवति। अतो बाह्ये शुक्त्यादौ ज्ञानाकारस्य रजतस्य आरोपो भवतीति तेषां मतम्। बौद्धनये विज्ञानप्रवाहातिरिक्तस्य नित्यस्य आत्मनः अस्वीकारात्, रजतस्य विज्ञानस्वरूपत्वात् तस्य ख्यातिः आत्मख्यातिः इत्युच्यते।

अख्यातिः – प्राभाकरमीमांसकानाम् अख्यातिवादः प्रसिद्धः। तेषां मते सर्वमेव ज्ञानं समीचीनम्। प्राभाकरमते इदं रजतम् इति शुक्तिरजतज्ञानस्थले हि ज्ञानद्वयमस्ति। तत्र इदम् इति प्रत्यक्षस्य विषयः, रजतम् इति स्मृतेः विषयः। अस्ति अनयोर्महान् भेदः। परन्तु तयोः भेदस्य अग्रहणात् सामानाधिकरण्येन इदम् रजतम् इति ज्ञानमुत्पद्यते। यतो हि अनुभव-स्मरणयोः विवेकस्य (भेदस्य) अग्रहणात् इदं रजतम् इति लोकप्रसिद्धं ज्ञानमुत्पद्यते, अतः एतेषां मतं विवेकाख्यातिः अख्यातिर्वेति कथ्यते।

अन्यथाख्यातिः – नैयायिकानां भाट्टमीमांसकानां च ख्यातिविषयको वादः अन्यथाख्यातिवाद इत्युच्यते। विपरीतख्यातिः इत्यस्य अपरं नाम। नैयायिकमते हि शुक्तौ इदं रजतम् इति भ्रमस्थले देशान्तरस्थं रजतमेव पुरोवर्तिन्यां शुक्तौ प्रतिभासते। अतः शुक्तेः अन्यथा देशान्तरस्थरजतादिरूपेण ज्ञानात् एतेषां मतम् अन्यथाख्यातिरित्युच्यते।

असत्ख्यातिः – शून्यवादिनो माध्यमिका बौद्धा हि असत्ख्यातिवादिनः। एतेषां मते इदं रजतम् इति शुक्तौ रजतभ्रमस्थले अधिष्ठानं शुक्तिरपि असत्, तत्र प्रतीयमानं रजतम् हि असत्। शुक्तौ अत्यन्तस्य असतः रजतस्य कल्पनात् ख्यातिरियं असत्ख्यातिरित्युच्यते।

अनिवर्चनीयख्यातिः – अद्वैतवेदान्तिनां मते तावत् शुक्तौ प्रतीयमानं रजतम् हि सदसद्भ्याम् अनिर्वचनीयम्। अतो इदं रजतम् इत्यत्र अद्वैतवेदान्तिभिः अनिर्वचनीयख्यातिः अङ्गीक्रियते।

आत्मख्यातिवादे विज्ञानधर्मस्य सत्यस्य एव रजतस्य भ्रमस्थले स्वीकारात्, अख्यातिवादे च स्मृतिविषयस्य सत्यस्य एव विषयस्य शुक्तौ इदं रजतम् इति ज्ञानस्थले अङ्गीकारात् , अन्यथाख्यातिवादे च देशान्तरस्थस्य सत्यस्यैव रजतस्य भ्रमस्थले प्रतीयमानत्वात् एतेषां सत्ख्यातिः इत्यभिधानेनापि व्यपदेशो भवति। उच्यते च इष्टसिद्धिकारेण विमुक्तात्मना –

अन्यथाख्यातिरख्यातिरात्मख्यातिरिति त्रयः।
सत्ख्यातिपक्षा नैतेऽपि विना सिध्यन्ति मायया॥

भगवद्रामानुजाचार्याणां ख्यातिविषयको मतवादोऽपि सत्ख्यातिरित्युच्यते। रामानुजाचार्याणां मते तावत् सर्वमेव भूतं पञ्चीकृतम्। अतः शुक्तौ रजते च सन्ति बहवः साधारणाः अवयवाः। शुक्तौ रजतावयवसदृशान् अवयवान् वीक्ष्यैव भवति ज्ञानम् इदं रजतमिति। परन्तु शुक्तौ रजतावयवसदृशावयवात् अतिरिक्ता ये अवयवाः सन्ति तेषां ज्ञानाभावात् शुक्तौ इदं रजतमिति इति जायमानं ज्ञानं भ्रम एव। अत्र ज्ञाने भासमानः विषयस्तु सन्, रजतावयवसदृशानाम् अवयवानां शुक्तौ दर्शनात्।

पाठगतप्रश्नाः ३

२०. ख्यातिपदस्य कोऽर्थः।
२१. आत्मख्यातिवादिनः के।
२२. अख्यातिवादिनः के।
२३. असत्ख्यातिवादिनः के।
२४. अद्वैतवेदान्तिनां ख्यातिवादः केन नाम्ना प्रसिद्धः।
२५. अन्यथाख्यातिं के अङ्गीकुर्वन्ति।
२६. अन्यथाख्यातेः अपरं नाम किम्।
२७. रामानुजाचार्याणां ख्यातिवादः केन नाम्ना प्रसिद्धः।

१४.६) परिणामवादः विवर्तवादश्च

शुक्तौ प्रतीयमानं रजतम् अज्ञानस्य परिणामः। शुक्तिविषयकम् अज्ञानमेव रजताकारेण परिणमते। तच्च रजतं शुक्त्यवच्छिन्नचैतन्यस्य विवर्तः। अतः अज्ञानं शुक्तिरजतस्य परिणाम्युपादानं, इदमवच्छिन्नरजतं च शुक्तिरजतस्य विवर्तोपादानम्। अपवादस्वरूपकथनकाले सदानन्दयोगीन्द्रेण वेदान्तसारे परिणामविवर्तयोः स्वरूपम् आलोच्यते। तथाहि रज्ज्वाः कार्यभूतस्य सर्पस्य यथा न रज्ज्वतिरिक्तसता अस्ति, तथैव ब्रह्मणः समुत्पन्नस्यास्य प्रपञ्चस्य ब्रह्मातिरिक्तसत्ता नास्ति। ननु कथं ब्रह्मणः समुत्पन्नं जगत्। कारणं कार्यसजातीयं भवतीति दार्शनिकानां राद्धान्तः। मतमेतदाधारीकृत्य एव सांख्यैः प्रतीयमानजगतः कारणरूपेण तत्सजातीयं प्रकृतितत्त्वमुपमीयते सामान्यतोदृष्टानुमानेन। परन्तु न हि ब्रह्मजगतोः सजातीयत्वमस्ति। ब्रह्म हि चेतनं जगच्च अचेतनम्, अतो जगद्विजातीयं ब्रह्म कथं जगत्कारणं स्यात्, किञ्च यदि ब्रह्म एव जगत् भवति तर्हि अयं प्रश्नः सुतरां समुदेति यत् किं सम्पूर्णं ब्रह्म एव जगद्रूपं धत्ते उत ब्रह्मणः अंशः कश्चन। प्रथमः पक्षः अङ्गीक्रियते चेत् जगद्रूपेण परिवर्तनकारणात् नास्ति इदानीं ब्रह्मेति समापतति, द्वितीये पक्षे च ब्रह्मणः सावयवत्वापत्तिः। अत्रोच्यते यत् न हि ब्रह्म जगद्रूपेण परिणमते येन पूर्वोक्तदोषाः समापतेयुः। ब्रह्मणि आरोपितं जगत्; अतो जगद् ब्रह्मणः विवर्तः, अज्ञानस्य च परिणामः। ननु किं नाम विवर्तः को वा परिणामः इति चेदुद्धरन्ति सदानन्दयोगीन्द्राः प्राचां वचः -

सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः।

अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः॥ इति।

कारणस्य स्वरूपतः एव अन्यथाभावः अन्यरूपधारणम् परिणामः, स्वरूपम् अपरित्यज्य कारणस्य अन्यथाभावः विवर्तः। यथा दधि दुग्धस्य परिणामः, दुग्धस्य स्वरूपतः एव अन्यथा स्थितिः भवति दधिरूपेण। अतो दधि परिणामः दुग्धस्य। अन्धकारे यदा रज्जौ सर्पः अनुभूयते तदा रज्जुः स्वस्वरूपम् अपरित्यज्य एव सर्पाकारेण प्रतिभासते। अतो यदा नायं सर्प इति सर्पस्य बाधो भवति तदा रज्जुमात्रम् अवशिष्यते। अतः सर्पः रज्जोः विवर्तः।

अप्पय्यदीक्षितः सिद्धान्तलेशसंग्रहे परिणामविवर्तयोः लक्षणमाह – वस्तुनस्तत्समसत्ताकोऽन्यथाभावः परिणामः, तदसमसत्ताको विवर्त इति। धर्मराजाध्वरीन्द्रेण वेदान्तपरिभाषायां तुल्यमेवोच्यते – परिणामो नामोपादानसमसत्ताककार्यापत्तिः। विवर्तो नामोपादानविषमसत्ताककार्यापत्तिः इति।

अद्वैतवेदान्ते सत्तात्रयम् अङ्गीक्रियते – पारमार्थिकसत्ता व्यावहारिकसत्ता प्रातिभासिकसत्ता चेति। पारमार्थिकसत्तायाः लक्षणं तावत् कालत्रयाबाध्यत्वम्। ब्रह्मव्यतिरिक्तस्य सर्वस्य एव ब्रह्मज्ञानेन बाध्यत्वात् ब्रह्मण एव कालत्रयाबाध्यत्वम्। अतः पारमार्थिकसत्ता केवलं ब्रह्मणः। व्यावहारिकसत्तायाः लक्षणं तावत् ब्रह्मज्ञानेतरज्ञानाबाध्यत्वम् इति। यस्याः सत्ताया ब्रह्मज्ञानेनैव बाधो भवति, न तदितरैः शुक्तिरज्जुज्ञानादिभिः, सा हि व्यावहारिकसत्ता। शुद्धब्रह्मणि आरोपितानाम् अज्ञानतत्कार्याणां च व्यावहारिकसत्ता अङ्गीक्रियते। ब्रह्मज्ञानेनैव एतेषां बाधो जायते। प्रातिभासिकसत्तायाः लक्षणं तावत्

ब्रह्मज्ञानेतरज्ञानबाध्यत्वम्। तथाहि शुक्तौ प्रतीयमानं रजतं ब्रह्मज्ञानभिन्नेन शुक्तिज्ञानेन बाधितं भवति, अतः शुक्तौ प्रतीयमानस्य रजतस्य सत्ता प्रातिभासिकी।

यदा उपादानस्य तत्कार्यस्य च सत्ता समाना भवति, तदा उपादानात् कार्योत्पत्तिः परिणाम इत्युच्यते। तथाहि, दुग्धस्य सत्ता व्यावहारिकी। दुग्धाद् उत्पन्नस्य कार्यस्य दध्नोऽपि सत्ता व्यावहारिकी, अतो दुग्धदध्नोः उपादानकार्ययोः समानसत्ताविशिष्टत्वात् दुग्धस्य दध्नः समुत्पत्तिः परिणामः। कारणस्य कार्यस्य च सत्ता यदि समाना न स्यात्तदा उपादानात् कार्योत्पत्तिः विवर्त इत्युच्यते। यथा ब्रह्मणः जगत् समुत्पद्यते। ब्रह्मणः सत्ता पारमार्थिकी, जगतः सत्ता व्यावहारिकी। ब्रह्म-जगतोः उपादानकार्ययोः विषमसत्ताविशिष्टत्वात् ब्रह्मणो जगदुत्पत्तिः विवर्त एव।

अद्वैतवादे जगतः सत्तामाधारीकृत्य मतत्रयं सुप्रसिद्धम् – अजातवादः दृष्टिसृष्टिवादः सृष्टिदृष्टिवादश्चेति। मूलसिद्धान्तसाम्येऽपि एतेषां मतभेदो वर्तते। गौडपादप्रमुखानाम् अजातवादिनां मते जगत् अजातं, नैव कदापि उत्पन्नम्। एते पारमार्थिकसत्तामात्रम् अङ्गीकुर्वन्ति। प्रकाशानन्दप्रमुखानां दृष्टिसृष्टिवादिनां नये तु यदा जगतः ज्ञानं भवति तदैव जगत् अस्ति, अज्ञानकाले जगत् नास्ति। एते पारमार्थिक-प्रातिभासिकरूपसत्ताद्वयमेवाङ्गीकुर्वन्ति। शङ्कराचार्यप्रमुखानां सृष्टिदृष्टिवादिनां मते जगद् ईश्वरेण सृष्टं, जीवेन च अनुभूयते। सुषुप्त्यादिषु यदा जगतः अनुभवो न भवति तदापि जगत् तिष्ठति। एते सत्तात्रयवादिनः। विवर्तपरिणामयोर्ये लक्षणे प्रस्तुते ते दृष्टिसृष्टिवादे न सङ्गच्छेते। यतो हि यथा दुग्धदध्नोस्तथा रज्जुसर्पयोरपि समानसत्ता वादेऽस्मिन् आपतति। अतः परिणामविवर्तयोर्द्वितीयलक्षणमुक्तम् अप्पय्यदीक्षितेन।

द्वितीयं लक्षणं तावत् - कारणसलक्षणोऽन्यथाभावः परिणामः, कारणविलक्षणोऽन्यथाभावः विवर्तः इति। तथाहि, यदा उपादानकारणस्य सजातीयकार्यरूपेण अन्यथाभावः तदा परिणामः, यदा च उपादानकारणस्य विजातीयकार्यरूपेण अन्यथाभावस्तदा विवर्तः। यथा दुग्धं दधि उभयमेव अचेतनम्। दुग्धस्य अचेतनस्य तत्सजातीयेन अचेतनेन दधिरूपेण अन्यथाभावः परिणामः, ब्रह्मणः चेतनस्य तद्विजातीयेन अचेतनेन जगद्रूपेण अन्यथाभावः विवर्तः। अत्रेदमाक्षिप्यते यत् शुक्तेः रजतोत्पत्तिरपि तर्हि परिणाम एव स्यात् शुक्तिरजतयोः उभयोरपि अचेतनत्वात्। अत्रोच्यते, न हि शुक्तिः रजतस्य उपादानम्। शुक्तेः उपादानं तु शुक्त्यवच्छिन्नं चैतन्यम्। न हि अज्ञानं तत्कार्यं शुक्तिम् आवृणोति, अज्ञानं शुक्त्यवच्छिन्नं चैतन्यमावृणोति। अतो शुक्त्यवच्छिन्नचैतन्याद् विजातीयस्य अचेतनस्य रजतस्य समुत्पत्तिः विवर्त एव। शुक्तेः रजतोत्पत्तिरिति संक्षेपविवक्षया कथ्यते। लक्षणस्यास्य निर्दुष्टत्वेऽपि परिणामविवर्तयोः तृतीयं लक्षणमाकलितम् अप्पय्यदीक्षितेन।

तृतीयं लक्षणं तावत् - कारणाभिन्नं कार्यं परिणामः, तदभेदं विनैव तद्व्यतिरेकेण दुर्वचं कार्यं विवर्त इति। उपादानकारणेन सह अभिन्नं कार्यं यदा उत्पद्यते तदा तत् कार्यं परिणाम इत्युच्यते। तथाहि, मृत्तिकायाः घटोत्पत्तौ मृत्तिकाघटयोः नास्ति भेदः। यो घटः सा एव मृत्तिका इति व्यवहारो लोके प्रसिद्धः। अतो घटः मृत्तिकायाः परिणामः। उपादानकारणेन सह अभेदं विनैव प्रतीयमानम्, उपादानकारणव्यतिरेकेण निरूपणायोग्यं कार्यं विवर्तः। शुक्तिरजतोदाहरणे तावत् प्रतीयमानरजतस्य शुक्तेश्च अस्ति भेदः। न हि कश्चित् यदेव रजतं सा एव शुक्तिः इति ब्रूते। परन्तु अधिष्ठानं शुक्तिं

व्यतिरिच्य रजतस्य सत्ता नैव प्रतिपादयितुं शक्यते। अतः शुक्तिरजतयोरभेदं विनापि शुक्तिव्यतिरेकेण दुर्वचं रजतं विवर्त एव।

पाठगतप्रश्नाः ४

२८. किं तावत् शुक्तिरजतस्य परिणाम्युपादानं, किं च विवर्तोपादानम्।

२९. सदानन्दयोगीन्द्रेण परिणामस्य किं लक्षणमुच्यते।

३०. सदानन्दयोगीन्द्रेण विवर्तस्य किं लक्षणमुक्तम्।

३१. वेदान्तपरिभाषायां परिणामविवर्तयोः किं लक्षणमुक्तम्।

३२. पारमार्थिकसत्तायाः किं तावल्लक्षणम्।

३३. व्यावहारिकसत्तायाः किं तावल्लक्षणम्।

३४. प्रातिभासिकसत्तायाः लक्षणं किम्।

३५. अद्वैतवादे जगतः सत्तामाधारीकृत्य के वादाः प्रसिद्धाः।

३६. सिद्धान्तलेशसङ्ग्रहे विवर्तपरिणामयोः तृतीयं लक्षणं किम्।

पाठसारः

पाठेऽस्मिन् अध्यासवस्तूत्पत्तिप्रकारविषये अध्यासकारणविषये अध्यस्तुवस्तुस्वरूपविषये च वैशद्येन आलोचितम्। विषयचैतन्येन सह प्रमातृचैतन्यस्य अभेदे सत्येव विषयस्य ज्ञानं भवति। अन्तःकरणं यदा चक्षुर्द्वारा विषयदेशं प्रति गच्छति, विषयाकारेण च परिणमते, तदा अन्तःकरणवृत्तिरुत्पद्यते। अन्तःकरणवृत्तिः विषयावच्छिन्नचैतन्यस्य आवरकम् अज्ञानं नाशयति। तेन च चैतन्यस्वरूपयोः विषयचैतन्यस्य-प्रमातृचैतन्ययोः च अभेदो भवति, विषयश्च प्रत्यक्षो भवति। शुक्तौ रजतभ्रमकाले अन्तःकरणं यदा काचकामलादिदोषयुक्तचक्षुरिन्द्रियद्वारेण शुक्त्या सह सम्बध्नाति तदा इन्द्रियदोषवशात् इदमिति वस्तुमात्रस्य सामान्यज्ञानं भवति, शुक्तित्वरूपविशेषस्य ज्ञानं न भवति। तत्र च चाकचिक्यादिसादृश्यदर्शनकारणात् रजतस्य संस्कारः उद्बुद्धो भवति। तदा शुक्तिविषयिणी अविद्या उद्बोधितरजतसंस्कारसामग्रीसहिता काचकामलादिदोषसहिता रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमते।

शुक्तौ इदं रजतम् इति जायमानं ज्ञानम् भ्रमः एव। भ्रमज्ञाने अधिष्ठानैकदेशस्य आरोप्यस्य च तादात्म्येन भानं भवति। इदं रजतम् इति ज्ञाने इदमंशः शुक्तेः सामान्यांशं बोधयति, रजतमिति च आरोप्यं रजतं निर्दिशति। चक्षुरिन्द्रियेण सह शुक्तेः सन्निकर्षवशात् इदमाकारा अन्तःकरणवृत्तिः उदेति। अतः

इदमिति ज्ञानं यथार्थम् एव। तथापि अनिर्वचनीयेन आरोपितेन रजतेन सह अभेदेन प्रतीयमानत्वात् इदं रजतम् इति ज्ञानं भ्रमः। इदन्तादात्मापन्नं रजतम् इत चात्र भवति बोधः।शुक्तौ प्रतीयमानं रजतम् हि अनिर्वचनीयम् आविद्यकं तत्कालोत्पन्नम् अभिनवं चेति।

भ्रमस्थले प्रतीयमानवस्तुनः किं तावत् स्वरूपम् इति विषये बहवो वादाः सन्ति। तेषु मुख्यास्तावत् – आत्मख्यातिः, अख्यातिः, अन्यथाख्यातिः, असत्ख्यातिः अनिर्वचनीयख्यातिश्चेति। सौत्रान्तिक-वैभाषिक-योगाचारबौद्धानां नये विज्ञानमेव बाह्यवस्त्वाकारेण प्रतिभासते। एतेषां मतम् आत्मख्यातिः इति प्रसिद्धम्। अख्यादिवादिनो हि प्राभाकरमीमांसकाः। तेषां नये इदम् इति प्रत्यक्षज्ञानविषयः, रजतम् इति च स्मृतेः विषयः। तयोः भेदे सत्यपि, दोषकारणात् भेदस्य ग्रहणं न भवति। तेन च अभेदेन इदं रजतम् इति ज्ञानं जायते इति प्राभाकरमतम्। नैयायिकाः भाट्टमीमांसकाश्च अन्यताख्यातिवादिनः। एतेषां मते देशान्तरस्थं सत्यं रजतमेव ज्ञानलक्षणसन्निकर्षेण पुरोवर्तिनि शुक्तौ प्रत्यक्षं भवति। शून्यवादिनो बौद्धा हि असत्ख्यातिवादिनः। एतेषां मते इदं रजतम् इति ज्ञाने शुक्तौ हि अत्यन्तस्य असतः रजतस्य भानं भवति। अद्वैतवेदान्तिनो हि अनिर्वचनीयख्यातिवादिनः। एते हि भ्रमभूतरजतस्य सदसद्भ्याम् अनिर्वचनीयत्वम् अङ्गीकुर्वन्ति।

रजतं हि शुक्तिविषयकाज्ञानस्य परिणामः, शुक्त्यवच्छिन्नचैतन्य च विवर्तः। एवं जगत् अपि अज्ञानस्य परिणामः, ब्रह्मणश्च विवर्तः। कारणात् तत्समानसत्ताविशिष्टस्य कार्यस्य उत्पत्तिः परिणामः, कारणात् तद्भिन्नसत्ताविशिष्टस्य कार्यस्य उत्पत्तिः विवर्तः। यथा व्यावहारिकसत्ताविशिष्टायाः मृत्तिकायाः व्यावहारिकसत्ताविशिष्टस्य घटस्य उत्पत्तिः भवति, अतः घटः मृत्तिकायाः परिणामः। व्यावहारिकसत्ताविशिष्टात् शुक्त्यवच्छिन्नचैतन्यात् प्रातिभासिकस्य रजतस्य उत्पत्तिः भवति, अतः रजतं शुक्त्यवच्छिन्नस्य चैतन्यस्य विवर्तः। एवं कारणस्य तत्सजातीयस्य अन्यरूपस्य प्राप्तिः परिणामः, विजातीयस्य अन्यरूपस्य प्राप्तिश्च विवर्तः। यथा जडस्य अज्ञानस्य तत्सजातीय-जड-प्रपञ्चरूपताप्राप्तिः परिणामः, चैतन्यस्वरूपस्य च ब्रह्मणः तद्विजातीय-जड-प्रपञ्चरूपताप्राप्तिः विवर्तः। किञ्च, कारणेन अभिन्नं कार्यं परिणामः, उपादानकारणेन सह अभेदं विनैव प्रतीयमानं किन्तु उपादानव्यतिरेकेम दुर्वचं कार्यं विवर्तः। मृत्तिकायाः उत्पन्नः तदभिन्नः घटः परिणामः, परन्तु चैतन्यात् भिन्नः परन्तु चैतन्यं विना अभावमापन्नः प्रपञ्चः विवर्तः। एवं परिणामविवर्तयोः आलोचनं शास्त्रेषु विधीयते।

अतो ब्रह्मणो विवर्तभूतं जगत् मिथ्या इति विज्ञाय बुधाः वैराग्योपेताः सन्तः मोक्षाय श्रवणमननिदिध्यासनेषु निरन्तरं निरताः स्युः इति शास्त्रस्य प्रतिपिपादयिषितम्।

पाठान्तप्रश्नाः

१. किमर्थं सर्वत्र ब्रह्मसत्ता अनुवर्तते।

२. रजतभ्रमकाले कुतो देशान्तरीयस्य रजतस्य न भानम्।

३. स्वाप्नजगत्प्रतीतौ दोषरूपेण किं वर्तते।

४. अद्वैतवेदान्ते ज्ञानस्थले विषयाकारा वृत्तिः किमर्थम् अङ्गीक्रियते।

५. प्रथमजगदुत्पत्तिः किमर्थं नाङ्गीक्रियते।

६. इदं रजतम् इति ज्ञाने देशान्तरस्थं रजतं न प्रतिभासते - कोऽत्र हेतुः।

७. शुक्तिरजतं सदसत् इति कुतः न स्वीक्रियते।

८. ख्यातिपदस्य व्युत्पत्तिर्लेख्या।

९. बौद्धनये आत्मा नाम कः।

१०. प्राभाकरमीमांसकनये इदं रजतम् इति ज्ञाने रजतम् इति कस्य अंशः।

११. सिद्धान्तलेशप्रोक्तं परिणामविवर्तयोः द्वितीयं लक्षणं किम्।

१२. कारणसलक्षणोऽन्यथाभावः परिणामः, कारणविलक्षणोऽन्यथाभावो विवर्तः – के अत्र उदाहरणे।

पाठगतप्रश्नानामुत्तराणि

पाठगतप्रश्नानामुत्तरम् १

१. प्रमायाः लक्षणं हि अनधिगताबाधितार्थविषयज्ञानत्वम् इति।

२. घटादिविषयावच्छिन्नं चैतन्यं हि विषयचैतन्यम्।

३. अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं हि प्रमाणचैतन्यम्।

४. अन्तःकरणावच्छिन्नं चैतन्यं हि प्रमातृचैतन्यम्।

५. शुक्तिरजतोत्पत्तौ काचकामलादिर्हि इन्द्रियदोषः।

६. आगन्तुकदोषजन्यत्वं प्रातिभासिकत्वे नियामकम्।

७. इदं रजतम् इति ज्ञाने इदमिति शुक्तेः सामान्यांशं निर्दिशति।

८. भ्रमभूतेन रजतेन सह तादात्म्येन प्रतीयमानात् तस्य मिथ्यात्वं कथ्यते।

९. काचकामलादिलोचनदोषकारणात् शुक्तेः शुक्तित्व-नीलपृष्ठत्वादीनां विशेषांशानां ज्ञानं न भवति।

१०. विषयचैतन्यावरकस्य अज्ञानस्य ज्ञानाय विषयाकारा अन्तःकरणवृत्तिः अपेक्षिता।

११. अविद्या यदा रजतसंस्कारेण सह वर्तते तदा रजतस्यारोपः, यदा च रङ्गसंस्कारेण सह वर्तते तदा रङ्गस्यारोपो भवति।

पाठगतप्रश्नानामुत्तरम् २

१२. आगन्तुकदोषः, संस्कारः, अधिष्ठानसामान्यज्ञानम्, सादृश्यम् अविद्या इत्यादयः हेतुरूपेण तिष्ठन्ति।

१३. अविद्या एव अध्यस्तवस्तुनः उपादानं भवति।

१४. आगन्तुकदोष-संस्कारादयः अध्यस्तवस्तुनः निमित्तकारणम्।

१५. यस्मात् कार्यस्य उत्पत्तिः भवति, कार्यनाशे कार्यस्य लयश्च यत्र सञ्जायते तदेव उपादानकारणम्।

१६. सर्वमपि कार्यं तेषाम् उपादानकारणस्य अविद्याया अधिष्ठाने ब्रह्मणि आश्रितं तिष्ठति।

१७. येषाम् अध्यासानां बाधः शुक्तित्वादिविशेषदर्शनेन भवति तेषु अध्यासेषु सादृश्यज्ञानं कारणम्।

१८. अद्वैतवेदान्तमते आरोपितं वस्तु हि अनिर्वचनीयम् आविद्यकम् तत्कालोत्पन्नम् अभिनवञ्च।

१९. न, ब्रह्मणि प्रपञ्चाध्यासे सादृश्यं न हेतुः।

पाठगतप्रश्नानामुत्तरम् ३

२०. ख्यातिशब्दस्य व्युत्पत्तिगतः अर्थः ज्ञानम् इति। भ्रमज्ञाने अस्य प्रयोगः रूढितो भवति।

२१. सौत्रान्तिका वैभाषिका योगाचाराश्च आत्मख्यातिवादिनः।

२२. प्राभाकरमीमांसका हि असत्ख्यातिवादिनः।

२३. शून्यवादिनो बौद्धा हि असत्ख्यातिवादिनः।

२४. अनिर्वचनीयख्यातिरिति नाम्ना प्रसिद्धः।

२५. भाट्टाः नैयायिकाश्च अन्यथाख्यातिवादम् अङ्गीकुर्वन्ति।

२६. विपरीतख्यातिः इति।

२७. सत्ख्यातिः इति।

पाठगतप्रश्नानामुत्तरम् ४

२८. शुक्तिविषयकम् अज्ञानं हि शुक्तिरजतस्य परिणाम्युपादानम्, शुक्त्यवच्छिन्नचैतन्यं च विवर्तोपादानम्।

२९. सतत्त्वतोऽन्यथाप्रथा इति परिणामलक्षणं तेन प्रतिपादितम्।

३०. अतत्त्वतोऽन्यथाप्रथा इति विवर्तलक्षणमुक्तं सदानन्दयोगीन्द्रेण।

३१. परिणामो नाम उपादानसमसत्ताककार्यापत्तिः, विवर्तो नाम उपादानविषमसत्ताककार्यापत्तिः इति।

३२. पारमार्थिकसत्ताया लक्षणं तावत् कालत्रयाबाध्यत्वम् इति। ब्रह्मण एव पारमार्थिकसत्ता अस्ति।

३३. ब्रह्मज्ञानेतरज्ञानाबाध्यत्वम् इति व्यावहारिकसत्ताया लक्षणम्।

३४. ब्रह्मज्ञानेतरज्ञानबाध्यत्वम् इति प्रातिभासिकसत्ताया लक्षणम्।

३५. अद्वैतवादे जगतः सत्तामाधारीकृत्य अजातवादः, दृष्टिसृष्टिवादः सृष्टिदृष्टिवादश्चेति वादत्रयं सुप्रसिद्धम्।

३६. कारणाभिन्नं कार्यं परिणामः, तदभेदं विनैव तद्व्यतिरेकेण दुर्वचं कार्यं विवर्त इति।

॥ इति चतुर्दशः पाठः ॥